# Surya Stuti

# સૂર્યસ્તુતિઃ

## Document Information

Text title : Surya Stuti 4

File name : sUryastutiH4.itx

Category : navagraha, shrIdharasvAmI, stuti

Location : doc_z_misc_navagraha

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

# સૂર્યસ્તુતિઃ

(અનુષ્ટુપ્છન્દઃ)

પ્રાતઃ કાલે ચ યો બ્રહ્મા મધ્યાહ્ને વિષ્ણુરુચ્યતે ।
સાયઙ્કાલે ચ યો રુદ્રસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧॥

સૃષ્ટિસ્થિતિલયાદીનાં કારણં યસ્ત્રિમૂર્તિતઃ ।
જગદાત્મેતિ યઃ પ્રોક્તસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૨॥

અઞ્ચતીત્યાત્મનો લક્ષ્મ યસ્મિન્ સ્પષ્ટં વિભાસતે ।
સ્વયં પ્રકાશરૂપોઽયસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૩॥

બાહ્યં બાહ્યપ્રકાશેન જ્ઞાનેનૈવાન્તરં ચ યઃ ।
પ્રકાશયતિ વિશ્વાત્મા તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૪॥

યં વિનૈવાત્ર ચૈતન્યં ન કોઽપિ લભતે યતઃ ।
સર્વચૈતન્યરૂપોઽયસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૫॥

ક્રિયાશક્તિસ્તથોત્સાહશ્ચોષ્ણતા પ્રાણધારણં
યસ્માત્તેજઃ પ્રેરણા ચ તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૬॥

યસ્યૈવ તપનાદ્વૃષ્ટિર્વૃષ્ટેરન્નં તતઃ પ્રજાઃ ।
પ્રત્યક્ષં દૃશ્યતે લોકે તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૭॥

સૂયતેઽનેન વિશ્વં યત્સવિતા તેન કથ્યતે
સર્વસૃષ્ટેઃ કારણં યસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૮॥

સૂર્યાદ્ભવન્તિ ભૂતાનિ સૂર્યેણ પાલિતાનિ તુ ।
યસ્માદુપનિષદ્બ્રૂતે તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૯॥

યત્પ્રભા શાન્તિદા રાત્રૌ ચન્દ્રે તારાગણેષુ ચ ।
નિખિલં ભાતિ યદ્ભાસા તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૦॥

આદિત્યોઽસૌ યતો બ્રહ્મ શ્રુતિભિર્ગીયતે મુહુઃ ।

એકમેવાદ્વયં તસ્માત્તં સૂર્યં પ્રણતોઽસ્મ્યહ્યમ્ ॥ ૧૧॥

મૃત્યોર્માઽમૃતં યસ્તુ તમસો જ્યોતિરુત્તમમ્ ।
ગમયત્યસતઃ સચ્ચ તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૨॥

ય ઓમિતિ સ્વરન્નેતિ સ સૂર્ય ઇતિ કથ્યતે ।
સ્વરૂપં યો દિશત્યેવં તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૩॥

રજ્જુસર્પસ્ય રજ્જુર્હિ સત્યરૂપં યથા તથા ।
વિશ્વસ્ય સત્યરૂપો યસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૪॥

યથૈકસ્મિન્દ્વિચન્દ્રત્વં તથૈવાજ્ઞાનયોગતઃ ।
યસ્મિન્ જીવેશ્વરાભાસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૫॥

યથૈવ વ્યોમ્નિ નીલત્વં યથા નીરં મરુસ્થલે ।
યસ્મિન્ માયા તથા મિથ્યા તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૬॥

પ્રદ્યોતનાચ્ચ ખદ્યોતો લોકબન્ધુસ્ત્રયી તનુઃ ।
ઇત્યાદિનામધર્તા યસ્તં સૂર્યં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૭॥

મિત્રાય રવયે તુભ્યં સૂર્યાયામિતતેજસે ।
નમો ભ્રાજિષ્ણવે તુભ્યં ભાનવે વિશ્વ હેતવે ॥ ૧૮॥

ખગાય પૂષ્ણે ભર્ગાય સ્વર્ણગર્ભાય તે નમઃ ।
નમો મરીચયે તુભ્યમાદિત્યાય નમો નમઃ ॥ ૧૯॥

દિવાકરાય ચાર્કાય સવિત્રે ભાસ્કરાય ચ ।
નમો જ્યોતિઃ સ્વરૂપાય નમો વૈ જાતવેદસે ॥ ૨૦॥

સહસ્રરશ્મયે તુભ્યં ઘૃણિને ચ નમો નમઃ ।
હિરણ્મયાય દિવ્યાય નમો વૈ વિશ્વચક્ષુષે ॥ ૨૧॥

માર્તાણ્ડાય નમસ્તુભ્યં નમો દ્યુમણયેઽનિશમ્ ।
ચૈતન્યાય નમસ્તુભ્યં વિશ્વપ્રાણાય તે નમઃ ॥ ૨૨॥

નમસ્તે બ્રહ્મરૂપાય નમસ્તે કર્મસાક્ષિણે ।
નમોઽજ્ઞાનવિનાશાય નમો જ્ઞાનપ્રદાય ચ ॥ ૨૩॥

પાહિ મે પુરતો નિત્યં પૃષ્ઠતોઽધસ્તથોર્ધ્વતઃ ।
વામતસ્સવ્યતશ્ચૈવ સર્વતઃ પાહિ મે સદા ॥ ૨૪॥

અહં ત્વં ચ ત્વમેવાહં બ્રહ્મણશ્ચૈકરૂપતઃ ।
આવયોરન્તરં નાસ્તિ ચાવાં સચ્ચિત્સુખાત્મકૌ ॥ ૨૫॥

આરોગ્યમૈશ્વર્યમપારવિદ્યાં
સદ્બુદ્ધિમેવં ચ સતાં સુસઙ્ગમ્ ।
ભક્તિં ચ ભુક્તિં ચ વિમુક્તભાવં
પ્રાપ્નોતિ સૂર્યસ્તુતિપાઠતશ્ચ ॥ ૨૬॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામીમહારાજવિરચિતા સૂર્યસ્તુતિઃ સમ્પૂર્ણા ।
કાલ - રથસપ્તમી રચનાસ્થાનં - શ્રી કાશીક્ષેત્રં સંવત્સરઃ - ૧૯૬૨

Proofread by Manish Gavkar

*Surya Stuti*
pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*